9I2EDVR

# सङ्कलनात्मकं मूल्याङ्कनम् - I (2014-15)

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - नवमी

समय : होरात्रयम् पूर्णाङ्काः 90

निर्देशाः

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः

खण्डः (ख) रचनात्मक-कार्यम् - 15 अङ्काः

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 30 अङ्काः

खण्डः (घ) पठित-अवबोधनम् - 35 अङ्काः

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - 10

मानवजीवने विद्यायाः महत्त्वं सर्वाधिकं वर्तते। आचार्यः एव छात्रान् सदाचारं, जितेन्द्रियत्वम् न्यायाचरणं च शिक्षयति। आचार्याणां सम्मानं शिष्याणां प्रथमः कर्त्तव्यः। यथा पुत्रः पितुः सम्मानं करोति, तस्य आज्ञां पालयति तथैव शिष्यैरपि आचार्याणाम् आज्ञा पालनीया। आचार्यः सदैव स्वछात्राणां हितकरणार्थं ज्ञानवृद्ध्यर्थं च चिन्तयति। एवं स्पष्टमिदं यत् गुरोः सम्मानेन एव ज्ञानप्राप्तिः संभवा। गुरोः कृपया एव ऋषयो, महर्षयः, कवया महाकवयश्च विविधविषयेषु निष्णाताः जाताः। अतः गुरुः आचार्यः वा सर्वदा पूज्यः, सम्मान्यः, श्रद्धेयः सेव्यश्च भवति।

I. एकपदेन उत्तरत।

(i) मानवजीवने कस्याः महत्त्वं सर्वाधिकं वर्तते?

(ii) ज्ञानप्राप्तिः केन संभवा?

II. पूर्णवाक्येन उत्तरत।

(i) गुरोः कृपया किम् अभवत्?

(ii) शिष्यानां कः प्रथमः कर्त्तव्यः?

III. **यथानिर्देशम् उत्तरत -**

(i) शिक्षयति इति क्रियायाः कर्तृपदम् किम्?

(क) छात्रान् (ख) आचार्यः

(ग) सदाचारं (घ) न्यायाचरणं

(ii) निपुणाः इति पदस्य अत्र किं पर्यायपदम्

(क) न्यायाचरणं (ख) सम्मानं

(ग) निष्णाताः (घ) ज्ञानप्राप्तिः

(iii) अपमानम् इति पदस्य अत्र किं विलोमपदम्?

(क) आज्ञां (ख) सदाचारं

(ग) सम्मानं (घ) सर्वाधिकं

(iv) अधोलिखितेषु आचार्यः - अस्य पदस्य विशेषणं किम्?

(क) श्रद्धेयः (ख) गुरुः

(ग) सदाचारं (घ) जितेन्द्रियत्वम्

IV. **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

## खण्डः 'ख'

## रचनात्मकं-कार्यम् - ( 15 अङ्काः )

2 भवत्याःनाम अनीशा अस्ति।भवत्याःभगिनी गुंजनःलण्डननगरेवसति।तस्याःसंस्कृतभाषायां रुचिःवर्तते।तस्याः उत्कण्ठां शमयितुम् लिखितम् इदं पत्रं मञ्जूषायां दत्तैःपदैःपूरयित्वापुनः उत्तरपुस्तिकायां लिखत। 5

रोहिणी

___(i)___

तिथिः_____

प्रियेभगिनि___(ii)___ !

सप्रेम नमोनमः।

अद्य मया___(iii)___पत्रं प्राप्तम्। संस्कृतविषयेतव अभिरुचिं ___(iv)___प्रसन्नता अभवत्।संस्कृतभाषासर्वासां ___(v)___ जननी अस्ति।पाणिनेःव्याकरणस्य उपयोगः___(vi)___ अपि अस्ति। अस्याःविशालःशब्दकोषः अद्वितीयः अस्ति।समृद्ध-संस्कृतसाहित्यस्यवैभवं अभूतपूर्वम् अस्ति। अधुनावैदेशिक-विद्वांसः अपि___(vii)___ महत्त्वं स्वीकुर्वन्ति। मनोयोगेन त्वं संस्कृतभाषायाः___(viii)___ कुरु इति मम निवेदनम्। शेषमत्र कुशलम्। शीघ्रं प्रत्युत्तरंप्रेषय।


तव___(ix)___

___(x)___

**मञ्जूषा**

संगणकयन्त्रे, ज्ञात्वा, अध्ययनम्, गुंजनं, नवदिल्लीतः, तव, भगिनी, संस्कृतभाषायाः, भाषाणाम्, अनीशा

3 **चित्रम् आधृत्य शब्दसूची-सहायतया संस्कृतेन पञ्चवाक्यानि लिखत –** 10



**मञ्जूषा**

संगीतसमारोहः, मञ्चे, संगीतकाराः, ध्वनिविस्तारकयन्त्राणि, गायकः, सप्तजनाः, चित्रम्, वाद्ययन्त्राणि, ढोलकम्, वादकाः, सज्जितम्, सितारे, मधुरं, गीतम्, गायति, वादयति, पश्यति, अपि।

**अथवा**

मञ्जूषायां प्रदत्तशब्दानां सहायतया 'विद्यालयस्य उत्सवः' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत। 10

**मञ्जूषा**

सज्जा, प्रबन्धः, पारितोषिक-वितरणम्, वार्षिकसमारोहः, सर्वे कर्मचारिणः व्यस्ताः, भूषयन्ति, पताकाभिः, अलंकुर्वन्ति, सभाध्यक्षः, सांस्कृतिक-कार्यक्रमः

## खण्डः 'ग'

## अनुप्रयुक्त व्याकरणम् – (30 अङ्काः)

4 **अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत –** 4

(i) ध् - वर्णस्य उच्चारणस्थानम् लिखत।

(ii) नम्रता - इति पदे मूर्धन्यं वर्णं लिखत।

रिक्तस्थानं पूरयत -

(iii) सम्राट् - स् + अ + म् + __________ आ + ट्

(iv) स् + प् + अ + र् + श् + अः = __________

5 अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - 5

(i) पुस्तकस्य नाम <u>हित + उपदेशः</u> इति अस्ति।

(अ) हितौपदेशः (ब) हितुपदेशः

(स) हितूपदेशः (द) हितोपदेशः

(ii) ब्राह्मणः राज्ञा <u>श्राद्ध + अर्थं</u> निमन्त्रितः।

(अ) श्राद्धर्थम् (ब) श्रद्धार्थम् (स) श्राद्धार्थम् (द) श्रद्धार्थाम्

(iii) <u>आवां रक्षक</u> ईश्वरः।

(अ) आवाम् + रक्षतु (ब) आवा + रक्षतु

(स) आवान् + रक्षतु (द) आवम् + रक्षतु

(iv) विद्यया भान्ति <u>सत् + गुणाः</u>।

(अ) सन्गुणाः (ब) सङ्गुणाः (स) सद्गुणाः (द) सदगुणाः

(v) <u>भ्रातृस्नेहः + तु</u> दुर्लभः।

(अ) भ्रातृस्नेहः तु (ब) भ्रातृस्नेहस्तु

(स) भ्रातृस्नेहास्तु (द) भ्रातृस्नेहश्तु

6 प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत - 5

(i) __________ पिच्छाः अद्भुताः भवन्ति।

(अ) मयूरः (ब) मयूरम्

(स) मयूरेण (द) मयूराणाम्

(ii) मम माता नित्यं प्रातः __________ प्रणमति।

(अ) रविः (ब) रवये

(स) रविम् (द) रवेः

(iii) __________ दृष्ट्वा गजः अहसत्।

(अ) मूषिकया (ब) मूषिकायाः

(स) मूषिका (द) मूषिकाम्

(iv) __________ शिक्षिका विदुषी अस्ति।

(अ) मह्यम् (ब) अस्माभिः

(स) अस्माकम् (द) अस्मासु

(v) शिशुभ्यः __________ रोचते।
(अ) मधु (ब) मधुम्
(स) मधुने (द) मधुभ्यः

7 अधोलिखितविकल्पेभ्यः धातोः उचितं रूपं चित्वा रिक्तस्थानं पूरयत - 5

(i) अभीप्सा वार्षिकोत्सवे पुरस्कारं ______।
(अ) लप्स्ये (ब) लप्स्यसे
(स) लप्स्यते (द) लप्स्यन्ते

(ii) भो छात्राः ! यूयं दीनजनान् सुष्ठु ______।
(अ) सेवध्वे (ब) सेवसे
(स) सेवन्ते (द) सेवामहे

(iii) पिता पुत्रं विद्यालयम् ______।
(अ) अनयत् (ब) अनयन्
(स) अनयम् (द) अनयाव

(iv) भोजनालये पाचकाः भोजनं ______।
(अ) पचामि (ब) पचन्ति
(स) पचामः (द) पचथ

(v) जन्मदिवसे त्वं किम् उपहारम् ______?
(अ) एषिष्यति (ब) एषिष्यामि
(स) एषिष्यसि (द) एषिष्यन्ति

8 कोष्ठके प्रदत्तशब्दानाम् उचित रुपैः रिक्तस्थानानि पूरयत- 5

(i) बालकाः बालिकाः च ______ परितः क्रीडन्ति। (जलाशय)
(ii) गुंजन ! ______ उभयतः दृष्ट्वा एव चल। (सरणि)
(iii) ______ भीतः रचितः वेगेन धावति। (कुक्कुर)
(iv) सुरभिः ______ सह विदेशं गमिष्यति। (नितिन)
(v) ______ नमः। (साधु)

9 रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं लिखत। 6

(i) नरः शकटात् <u>अव+रुह्+ल्यप्</u> गृहं प्रविशति।

(ii) ग्रीष्मे जनाः तक्रं <u>पातुम्</u> इच्छन्ति।

(iii) परीक्षापरिणामं ज्ञा+क्त्वा सा प्रसन्ना अभवत्।

(iv) अहं मातामहीं मिल्+तुमुन् ग्रामं गच्छामि।

(v) राजा पुत्राणाम् आचारहीनतां विचिन्त्य दुःखम् अन्वभवत्।

(vi) छात्राः ध्वजं नत्वा राष्ट्रगीतं गायन्ति।

## खण्ड : 'घ'
## पठित-अवबोधनम् - 35 अङ्काः

10 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** 5

अस्ति उज्जयिन्याम् माधवः नाम विप्रः। एकदा तस्य भार्या स्वबालापत्यस्य रक्षार्थं तम् अवस्थाप्य स्नातुं गता। अथ ब्राह्मणः राज्ञा श्राद्धार्थं निमन्त्रितः। ब्राह्मणः सहजदारिद्र्यात् अचिन्तयत् यदि सत्वरं न गच्छामि, तदा अन्यः कश्चित् श्राद्धार्थं वृत्तः भवेत्।

**I एकपदेन उत्तरत।**

(i) विप्रस्य नाम किमासीत्?

(ii) ब्राह्मणः राज्ञा किमर्थं निमन्त्रितः?

**II पूर्णवाक्येन उत्तरत।**

बालस्य रक्षार्थं का चिन्तिता आसीत्?

**III यथानिर्देशम् उत्तरत।**

(i) 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) राज्ञे (ब) भार्यायै (स) विप्राय (द) श्राद्धाय

(ii) 'गता' इति क्रियापदस्य कर्तृपदं किम्?

(अ) विप्रः (ब) तस्य (स) माधवः (द) भार्या

11 **अधोलिखितम् पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।** 5

यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्।।

**I. एकपदेन उत्तरत।**

(i) श्लोकानुसारं प्रभुत्वम् अपि कस्मै भवितुम् शक्नोति?

(ii) अस्मिन् श्लोके कति गुणाः वर्णिताः?

II. पूर्णवाक्येन उत्तरत ।
अनर्थाय किम् किम् भवति?

III. यथानिर्देशम् उत्तरत -

(i) मूर्खता इति पदस्य अत्र किं पर्यायपदम्?

(क) यौवनम् (ख) प्रभुत्वम्
(ग) अविवेकता (घ) अनर्थाय

(ii) दासत्वम् इति पदस्य अत्र किं विलोमपदम्?

(क) चतुष्टयम् (ख) प्रभुत्वम्
(ग) धनसम्पत्ति (घ) अविवेकिता

12 नाट्यांशं पठित्वा प्रश्नान् उत्तरत - 5

रामः – वत्स लक्ष्मण! किमेवं भरतः प्राप्तः?
लक्ष्मणः – आर्य! अथ किम्!
सीता – आर्यपुत्र! किं भरतः आगतः?
रामः – मैथिलि! अथ किम्?
लक्ष्मणः – आर्य! किं प्रविशतु कुमारः?
रामः – अथवा तिष्ठ त्वम्। तस्य मानहेतोः इयं स्वयं गच्छतु?
सीता – यत् आर्यपुत्र आज्ञापयति।
भरतः – अये, इयमत्रभवती जनकराजपुत्री? आर्ये,! अभिवादये भरतोऽहमस्मि।

I. एकपदेन उत्तरत।

(i) कः तत्र प्राप्तः?
(ii) का तस्य मानहेतोः गच्छतु?

II. पूर्णवाक्येन उत्तरत -
सीतां विलोक्य भरतः किं कथयति?

III. उचितम् उत्तरं चित्वा लिखत -

(i) 'आगतः' इति पदस्य कः पर्यायशब्दः अत्र प्रयुक्तः?

(अ) प्राप्तः (ब) तिष्ठ (स) प्रविशतु (द) गच्छतु

(ii) अत्र 'इयम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) रामाय (ब) भरताय (स) लक्ष्मणाय (द) सीतायै

13 अधोलिखितपंक्तीनाम् उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत - 4

(i) न चातिदीर्घसूत्री स्यात्।

(क) शरीरे दीर्घं सूत्रं न धारयेत्।
(ख) कार्यं विलम्बेन न कुर्यात्।

(ग) अतिदीर्घानि सूत्राणि न स्मरेत्।

(ii) अनुद्धताः सत्पुरुषाः समृद्धिभिः।

(क) सज्जनाः सम्पन्नतां प्राप्य उद्धताः भवन्ति।

(ख) सत्पुरुषाः व्यसनकाले विनम्राः भवन्ति।

(ग) सज्जनाः सम्पन्नतां प्राप्य विनम्राः भवन्ति।

(iii) न दुष्टयानानि आरोहेत्।

(क) न दुष्टैः सह वाहनानि आरोहेत्।

(ख) विकृतानि वाहनानि नआरोहेत्।

(ग) दूषितानि स्थानानि न गच्छेत्।

(iv) न कार्यकालमतिपातयेत्।

(क) कार्यं सदैव अति एव कुर्यात्।

(ख) कार्यंकालं समये एव कुर्यात्।

(ग) कार्यं सदैव समये एवं कुर्यात्। 4

14 **अधोलिखित-पद्यांशयोः अन्वययोः मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिम् कुरुत -**

(क) स जातो येन जातेन याति वंशः समुन्नतिम्।
परिवर्तिनि संसारे मृतः को वा न जायते।।

**अन्वयः** - स जातः येन __(i)__ वंशः समुन्नतिम् __(ii)__ (यतः) परिवर्तिनि __(iii)__ कः वा मृतः न __(iv)__ ।

(ख) स्वस्थवृत्तं यथोद्दिष्टं यः सम्यगनुतिष्ठति।
स समाः शतमव्याधिरायुषा न वियुज्यते।।

**अन्वयः** - यः यथोद्दिष्टं __(v)__ सम्यक् __(vi)__ सः शतम् __(vii)__ अव्याधिः (भूत्वा) __(viii)__ न वियुज्यते।

**मञ्जूषा**

आयुषा, जातेन, अनुतिष्ठति, संसारे, स्वस्थवृत्तं, याति, समाः, जायते। 4

15 **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।**

(i) गुरुं प्रति गच्छ।

(ii) असद्भिः शपथेन प्रोक्तं जले लिखितमक्षरम्।

(iii) भरतः वरं हर्तुम् इच्छति।

(iv) राजपुत्राः नीतिं ग्राहयितुं शक्यन्ते।

16 अधोलिखितवाक्यानि कथाक्रमेण संयोज्य लिखत। 4

(i) नकुलस्य मुखं पादाः च रक्तेन विलिप्ताः भवन्ति।

(ii) स ब्राह्मणः नकुलं बालरक्षायाम् स्थापयति।

(iii) उज्जयिन्यां माधवः नाम विप्रः वसति।

(iv) ब्राह्मणः श्राद्धार्थं राज्ञा निमन्त्रितः भवति।

(v) ब्राह्मणः नकुलं हत्वा आत्मानं मुषितं मन्यते।

(vi) ब्राह्मणी शिशोः रक्षार्थं ब्राह्मणं नियोज्य स्नातुं गच्छति।

(vii) नकुलः समीपम् आगच्छन्तं कृष्णसर्पम् मारयति।

(viii) ब्राह्मणः 'नकुलेन मे पुत्रः खादितः' इति चिन्तयति।

17 (क) प्रसङ्गानुसारं रेखाङ्कितपदयोः उचितम् अर्थम् चित्वा लिखत - 4

(i) विद्याहीनाः निर्गन्धाः <u>किंशुकाः</u> इव न शोभन्ते।

(अ) कनेरपुष्पाणि (ब) पलाशपुष्पाणि

(स) कमलानि (द) पाटलपुष्पाणि

(ii) <u>कुत्सयन्</u> अन्नं न खादेत्।

(अ) निन्दन् (ब) चिन्तन् (स) पठन् (द) कुर्वन्

(ख) शब्दानाम् अर्थैः सह मेलनं कुरुत -

| | | |
|---|---|---|
| (i) | उपेतः | इच्छा |
| (ii) | न्यग्रोधः | नासिका |
| (iii) | तृष्णा | युक्तः |
| (iv) | घ्राणम् | वटः |